श्री आनन्दतीर्थाचार्यविरचितः

माध्वसन्न्यासपद्धतिः



सम्पादकः

श्री व्यासनकेरे प्रभञ्जनाचार्यः

।। श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवाय नमः ।।

आनन्दतीर्थाचार्यविरचितः

माध्वसन्न्यासपद्धतिः

हेमाद्र्यादिनिबन्धेन मनौ बौधायने तथा ।
अष्टौ श्राद्धानि चोक्तानि शौनकेन विशेषतः ।।

तानि नेच्छन्ति केचित् तु आत्मनः श्राद्धमात्रकम् ।
इच्छन्त्यत्र प्रमाणं हि निबन्धादौ न दृश्यते ।।

परेद्युर्भोजयेद्विप्रानिति मानं प्रचक्षते ।
तद्व्याख्यानस्य सङ्कोचे मानमात्रं न दृश्यते ।।

आचारादेव कुर्वन्ति आत्मनः श्राद्धमात्रकम् ।
तत्प्रयोगं प्रवक्ष्यामि सन्न्यासग्रहणस्य च ।
निरग्निकस्य गृह्याग्नेः सुखानुष्ठानसिद्धये ।।

केचिदात्मश्राद्धमेव कुर्वन्ति । तत्प्रकारश्च – देशकालौ सङ्कीर्त्य, 'सन्न्यासाङ्गभूतं आत्मश्राद्धं करिष्ये' इति सङ्कल्प्य, सूक्तजपादिद्वितीयक्षणदानान्तं कृत्वा, 'सत्यवसुसञ्ज्ञका विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः स्वाहा नमः देवस्थाने क्षणं दत्वा, भवद्भिः क्षणप्रसादः कर्तव्यः' इति द्वौ ब्राह्मणौ निमन्त्रणीयौ । ततः सयवकुशं गृहीत्वा, 'आत्मनान्दीमुखाः भूर्भुवः स्वः स्वाहा नमः आत्मश्राद्धे भवद्भ्यां क्षणप्रसादः कर्तव्यः' इति द्वौ निमन्त्रणीयौ । एवं पितृपितामहस्थाने द्वौ निमन्त्रणीयौ । एवं षट् ब्राह्मणाः। अथ वा चत्वारः । विश्वेदेवार्थं द्वौ । आत्मपितृपितामहार्थे द्वौ । उदकसंस्थे चतुरस्रे मण्डले कृत्वा, दक्षिणमण्डले यवकुशं गृहीत्वा 'विश्वेदेवाः

स्वागतम्' इति स्पृष्ट्वा, 'सुस्वागतम्' इत्युक्ते 'सत्यवसुसञ्ज्ञका विश्वेदेवाः नान्दीमुखाः इदं वः पाद्यम् स्वाहा नमः' इति यवोदकं विप्रद्वयपादेषु सहैव क्षिपेत् । ततः गृहीत्वा, 'आत्मन् नान्दीमुखः भूर्भुवः स्वः इदं ते पाद्यं स्वाहा नमः' इति द्वयोः सहैव पाद्यं दद्यात् । एवं पितृपितामहयोर्ज्ञेयम् । ब्राह्मणद्वये तु, 'आत्मपितृपितामहाः नान्दीमुखाः इदं वः पाद्यं स्वाहा नमः' इति द्वयोः सहैव पाद्यं दद्यात् । आचमनं कृत्वा, ब्राह्मणेष्वाचान्तेषु वैश्वदेवब्राह्मणौ पूर्वाभिमुखौ उपवेश्य, आग्नेयमारभ्य पश्चिमसंस्थान् आत्मन्ब्राह्मणानुपवेशयेत ।

'उपक्रान्तमात्मश्राद्धं करिष्ये' इति सङ्कल्प्य, दिग्बन्धं कृत्वा, ततः हस्तोदकौ दत्वा, 'सत्यवसुसञ्ज्ञका विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं वः आसनं स्वाहा नमः' इति आसनं हस्तोदकं दत्वा, आत्मश्राद्धे दैवेक्षणः क्रियेताम् । विप्रौ – 'ॐ' । तथा – 'प्राप्नुता भवन्तौ' । विप्रौ – 'प्राप्नुवामः' । अर्घ्यपात्रद्वयं प्राक्संस्थमासाद्य जलमापूर्य 'यवोऽसि' इति मन्त्रेण देवपात्रे यवान् निक्षिप्य गन्धपुष्पाणि निक्षिप्त्वा, 'विश्वेदेवास' इति मन्त्रेण मूर्धादिपादपर्यन्तं यवैरर्चयेत् । विश्वेदेवास आगतः । देवपात्रे सम्पन्ने 'सुसम्पन्ने' इत्युक्ते, 'स्वाहार्घ्यौ सत्वर्घ्यौ' इति प्रतिवचनम् । विश्वेदेवस्य द्वितीयब्राह्मणस्य हस्तोपरि प्रथमब्राह्मणहस्तं निधाय, प्राक्संस्थमर्घ्यं दद्यात् – 'सत्यवसुसञ्ज्ञकाः विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदं वोऽर्घ्यं स्वाहा नमः' अस्त्वर्घ्यम् । ततो गन्धपुष्पधूप- दीपाच्छादनानि दद्यात् ।

ततो आत्मश्राद्धे ब्राह्मणहस्तोदकं दत्वा, 'आत्मपितृपितामहाः प्रद्युम्नसङ्कर्षणवासुदेवाः नान्दीमुखाः भूर्भुवस्वः इदं वः आसनं स्वाहा नमः' इति आसनम् । ब्राह्मणषट्के तु 'आत्मन् प्रद्युम्नादि नान्दीमुखः भूर्भुवः स्वः इदं वः आसनं स्वाहा नमः' इति आसनम् । द्वयोः । एवं पितृपितामहयोर्ज्ञेयम्। ततो हस्तोदकं दत्वा, 'आत्मपितृपितामहः नान्दीमुखाः भूर्भुवः स्वः

सन्न्यासाङ्गात्मश्राद्धे इदं वः क्षणः क्रियतां स्वाहा नमः' इति । विप्रौ – ॐ। तथा – 'प्राप्नुता भवन्तौ' । 'प्राप्नुवः' इति विप्रौ । आत्माद्यर्घ्यपात्राणिप्राक् संस्थान्यासाद्य तेषु अप आसिच्य 'शन्नो देवीः' इत्यभिमन्त्र्य, 'यवोऽसि धान्यराजो वा गोसवो देवनिर्मितः प्रत्नवद्भिः प्रत्तपुष्ट्या नान्दीमुखानिमान् लोकान् प्रीणयाहि नः स्वाहा नमः' इति प्रतिपात्रे मन्त्रावृत्त्या यवान् निक्षिप्य गन्धपुष्पाणि निक्षिप्य 'उशान्तत्वानि धीमहि' इत्यनेन मूर्धादिपादपर्यन्तं यवैरर्चयेत् ।

हस्तोदकं दत्वा द्वितीयब्राह्मणहस्तोपरि प्रथमब्राह्मणहस्तं निधाय ततः पात्रान्तरेण प्रथमपात्रोदकं स्वदक्षिणहस्ते गृहीत्वा, द्वितीयपात्रस्थमुदकं च गृहीत्वा, 'आत्मन् प्रद्युम्न नान्दीमुख भूर्भुवः स्वः इदं ते अर्घ्यं स्वाहा नमः' इति द्विरर्घ्यं दद्यात् । हस्तोदकं दत्वा द्वितीयपात्रोदकं पात्रान्तरेण हस्ते गृहीत्वा, तृतीयपात्रान्तरस्थमुदकं च गृहीत्वा 'पिता सङ्कर्षण नान्दीमुख भूर्भुवः स्वः इदं ते अर्घ्यं स्वाहा नमः' इति द्विरर्घ्यं दद्यात् । हस्ते उदकं दत्वा, तृतीयपात्रोदकं पात्रान्तरेण स्वदक्षिणहस्ते गृहीत्वा, प्रथपात्रान्तरस्थमुदकं च गृहीत्वा 'पितामह वासुदेव नान्दीमुख भूर्भुवः स्वः इदं ते अर्घ्यं स्वाहा नमः' इति द्विरर्घ्यं दद्यात् । 'या दिव्या आपः' इत्यस्य प्रत्यर्घ्यं आवृत्तिः कार्या ।

'अर्चत प्रार्चत' इत्यनेन अर्चयेत् । ततो गन्धादीनि द्विर्द्विर्दत्वा भस्ममर्यादान्तं कुर्यात् । पाणिहोमार्थमन्नं गृहीत्वा, उपवीतेन ब्राह्मणहस्तेषु परिसमूहनपरिस्तरणपरिषेचनं कृत्वा मे क्षणेनावदानधर्मेणावदाय, 'अग्नये कव्यवाहनाय स्वाहा', 'सोमाय पितृमते स्वाहा' इति द्वे आहूती अंशीकृत्य, सर्वपितृब्राह्मणपाणिषु हुत्वा परिषेचनं कृत्वा, उपस्थानं कुर्यात् । ततः परिवेषणं कृत्वा हुतशेषममन्त्रेषु सर्वं दद्यात् । ततः गायत्र्या प्रोक्ष्य, 'पृथिवी ते पात्रम्०' सत्यवसुसञ्ज्ञका विश्वेदेवाः नान्दीमुखाः भूर्भुवः स्वः इदमन्नं

दास्यमानं च आतृप्तेः स्वाहा नमः' इति यवोदकं दद्यात्। 'यद्देवास' इति मन्त्रेण सम्प्रार्थयेत्। ततः परिवेषणं कृत्वा 'पृथिवी ते पात्रम्' इत्युक्त्वा, 'आत्मपितृपितामहाः प्रद्युम्नसङ्कर्षणवासुदेवा नान्दीमुखाः भूर्भुवः स्वः इदमन्नं दत्तं यथाशक्ति सोपस्करं दास्यमानं च आतृप्तेः वः स्वाहा नमः' इति यवोदकं दद्यात्।

द्वितीयब्राह्मणाय एवमेवोक्त्वाऽन्नं दद्यात्। षट्ब्राह्मणपक्षे, एकवचनेन पृथक्प्रयोगः कार्यः।

ततो ब्रह्मार्पणादिसर्वं कृत्वा ब्राह्मणेभ्य आपोशने दद्यात्। ब्राह्मणा बलिदानवर्जं भुञ्जीयुः। तत्र वैष्णवैन्द्रराक्षोघ्नसूक्तानि जपेत्। ततस्तृप्तान् ज्ञात्वा 'उपास्मै गायता नर' इति पञ्चर्चं 'अक्षं न मीमदन्त' इति चोक्त्वा 'सम्पन्नम्' इति पृष्ट्वा दैवेरुचिरमिति तृप्तिप्रश्नः। अथैवं 'आत्मपितृपितामहाः नान्दीमुखाः रुचिरम्' इति तृप्तिप्रश्नः। तेऽपि 'रुचिरम्' इति ब्रूयुः।

देशकालौ सङ्कीर्त्य, 'सन्न्यासाङ्गभूतात्मश्राद्धाङ्गभूतं पिण्डदानम्' इति सङ्कल्प्य आपोशनं दद्यात्। ततः शुद्धाचनं कृतेषु विप्रेषु भोजनगृहाद्बहिः भोजनपात्राणि निष्कास्य, उपलिप्य भोजनस्थाने पूर्वाभिमुखः 'अपहतासुरा रक्षांसि पिशाचा वेदिषद' इत्यनेन स्वपेन कुशेन प्रागपवर्गां रेखां लिखित्वा, तामभ्युक्ष्य, तदुपरि सकृदाच्छिन्नैरित्यनेन प्रागग्रान् दर्भानास्तीर्य, 'शुद्धन्तामात्मानः, शुद्धन्तां पितरः, शुद्धन्तां पितामहाः नान्दीमुखाः' इत्युक्त्वा तत्र यवोदकं दद्यात्। दधिपृष्टदाज्यघृतबदरीफलसंयुक्तं भुक्तशेषान्नेन पिण्डयद्वं(ज्ञं?) कृत्वा, तत्र 'एतत् ते आत्मन् प्रद्युम्न नान्दीमुख भूर्भुवः स्वः अयं ते पिण्डः स्वाहा नमः' इति पिण्डं दत्वा तदुत्तरं तूर्ष्णीं द्वितीयपिण्डं दद्यात्। तदग्रे 'एतत् ते पितः सङ्कर्षण नान्दीमुख भूर्भुवः स्वः अयं ते पिण्डः' इति पिण्डं दत्वा, तदुत्तरं तूर्ष्णीं द्वितीयमपि पिण्डं दद्यात्। तदग्रे 'एतत् ते पितामह वासुदेव नान्दीमुख भूर्भुवः स्वः अयं ते पिण्डः'

इति पिण्डं दद्यात् । तदुत्तरतः तूष्णीं द्वितीयमपि पिण्डं दद्यात् । 'शुद्धन्ताम्' इत्युक्त्वा यवोदकं दत्वा, ततः पिण्डदानुमन्त्रणादि कुर्यात् । पिण्डपात्रमधोमुखं न कुर्यात् । अनुमन्त्रादि- स्वस्तिवाचनान्तं कृत्वा, क्षीरयवोदकेन 'सत्यवसुसञ्ज्ञकेभ्यो विश्वेदेवेभ्यो यद्दत्तं श्राद्धमक्षयोदकं स्वाहा नमः' इति द्वयोर्हस्ते दद्यात् । विप्रौ 'अस्त्वक्षय्यम्' इति वदेताम् । ततः 'आत्मा प्रद्युम्नः नान्दीमुखः भूर्भुवः स्वः आत्मश्राद्धे दत्तं तदक्षयोदकं स्वाहा नमः' इति द्वयोर्हस्ते द्विर्दद्यात् । एवं पितृपितामहयोरपि दद्यात् । एवं ब्राह्मणषट्के ज्ञेयम् । ब्राह्मणद्वये तु, एवमेवोक्त्वा द्वयोरेव हस्ते दद्यात्। श्राद्धशेषं समाप्य श्राद्धप्रतिष्ठासिद्ध्यर्थं द्राक्षामसुकनिष्क्रयभूतां दक्षिणां दद्यात् । ततः ब्राह्मणान् नमस्कृत्य, क्षन्तव्यमिति प्रार्थयेत् । तत्र मन्त्रः –

सन्न्यासार्थं मया श्राद्धं कृतमेतद्द्विजोत्तमाः ।
अनुज्ञां प्राप्य युष्माकं सिद्धिं यास्यामि शाश्वतीम् ।।' इति ।

'सम्पन्नम्' इत्युक्त्वा 'ॐ स्वाहा' इत्युक्त्वा ब्राह्मणान् विसर्जयेदिति।

विष्णुतीर्थोक्तिमाश्रित्य मनुं बौधायनं तथा ।
व्यासाचार्यस्यानुजेन कृताऽऽत्मश्राद्धपद्धतिः ।।

सुखाधिष्ठानसंसिद्ध्यै प्रीत्यै मध्वनृसिंहयोः ।
जामदग्र्यहिरण्यस्य सुतो भट्टजनार्दनः ।
तत्सुतानन्दतीर्थस्य कृतिरस्त्वर्पिता हरौ ।

।। इति श्री आनन्दतीर्थविरचितात्मश्राद्धप्रयोगः समाप्तः ।।